# nArAyaNavarma

# નારાયણવર્મ

## Document Information

Text title : nArAyaNavarma

File name : naaraayanavarma.itx

Category : vishhnu, narayana, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, PSA Easwaran

Description-comments : bhAgavate_ShaShThaskandha

Latest update : December 31, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 4, 2021

*sanskritdocuments.org*

# નારાયણવર્મ

શ્રી ગણેશાય નમઃ ।
રાજોવાચ ।
યયા ગુપ્તઃ સહસ્રાક્ષઃ સવાહાન્ રિપુસૈનિકાન્ ।
ક્રીડન્નિવ વિનિર્જિત્ય ત્રિલોક્યા બુભુજે શ્રિયમ્ ॥ ૧॥

ભગવંસ્તન્મમાખ્યાહિ વર્મ નારાયણાત્મકમ્ ।
યથાતતાયિનઃ શત્રૂન યેન ગુપ્તોઽજયન્મૃધે ॥ ૨॥

શ્રીશુક ઉવાચ ।
વૃતઃ પુરોહિતસ્ત્વાષ્ટ્રો મહેન્દ્રાયાનુપૃચ્છતે ।
નારાયણાખ્યં વર્માહ તદિહૈકમનાઃ શ‍ૃણુ ॥ ૩॥

શ્રીવિશ્વરૂપ ઉવાચ ।
ધૌતાંઘ્રિપાણિરાચમ્ય સપવિત્ર ઉદઙ્મુખઃ ।
કૃતસ્વાઙ્ગકરન્યાસો મન્ત્રાભ્યાં વાગ્યતઃ શુચિઃ ॥ ૪॥

નારાયણમયં વર્મ સન્નહ્યેદ્ભય આગતે ।
દૈવભૂતાત્મકર્મભ્યો નારાયણમયઃ પુમાન ॥ ૫॥

પાદયોર્જાનુનોરૂર્વોરુદરે હૃદ્યથોરસિ ।
મુખે શિરસ્યાનુપૂર્વ્યાદોઙ્કારાદીનિ વિન્યસેત્ ॥ ૬॥

ૐ નમો નારાયણાયેતિ વિપર્યયમથાપિ વા ।
કરન્યાસં તતઃ કુર્યાદ્દ્વાદશાક્ષરવિદ્યયા ॥ ૭॥

પ્રણવાદિયકારાન્તમઙ્ગુલ્યઙ્ગુષ્ઠપર્વસુ ।
ન્યસેદ્ધૃદય ૐકારં વિકારમનુમૂર્ધનિ ॥ ૮॥

ષકારં તુ ભ્રુવોર્મધ્યે ણકારં શિખયા ન્યસેત્ ।
વેકારં નેત્રયોર્યુંજ્યાન્નકારં સર્વસન્ધિષુ ॥ ૯॥

મકારમસ્ત્રમુદ્દિશ્ય મન્ત્રમૂર્તિર્ભવેદ્બુધઃ ।
સર્વિસર્ગં ફડન્તં તત્સર્વદિક્ષુ વિનિર્દિશેત્ ॥ ૧૦॥

ૐ વિષ્ણવે નમઃ ।
ઇત્યાત્માનં પરં ધ્યાયેદ્ધ્યેયં ષટ્શક્તિભિર્યુતમ્ ।
વિદ્યાતેજસ્તપોમૂર્તિમિમં મન્ત્રમુદાહરેત્ ॥ ૧૧॥

ૐ હરિર્વિદધ્યાન્મમ સર્વરક્ષાં ન્યસ્તાંઘ્રિપદ્મઃ પતગેન્દ્રપૃષ્ઠે ।
દરારિચર્માસિગદેષુચાપપાશાન્દધાનોઽષ્ટગુણોઽષ્ટબાહુઃ ॥ ૧૨॥

જલેષુ માં રક્ષતુ મત્સ્યમૂર્તિર્યાદોગણેભ્યો વરુણસ્ય પાશાત્ ।
સ્થલેષુ માયાબટુવામનોઽવ્યાત્ ત્રિવિક્રમઃ ખેઽવતુ વિશ્વરૂપઃ ॥ ૧૩॥

દુર્ગેષ્વટવ્યાજિમુખાદિષુ પ્રભુઃ પાયાન્નૃસિંહોઽસુરયૂથપારિઃ ।
વિમુઞ્ચતો યસ્ય મહાટ્ટહાસં દિશો વિનેદુર્ન્યપતંશ્ચ ગર્ભાઃ ॥ ૧૪॥

રક્ષત્વસૌ માઽધ્વનિ યજ્ઞકલ્પઃ સ્વદંષ્ટ્રયોન્નીતધરો વરાહઃ ।
રામોઽદ્રિકૂટેષ્વથ વિપ્રવાસે સલક્ષ્મણોઽવ્યાદ્ભરતાગ્રજો મામ્ ॥ ૧૫॥

મામુગ્રધર્માદખિલાત્પ્રમાદાન્નારાયણઃ પાતુ નરશ્ચ હાસાત્ ।
દત્તસ્ત્વયોગાદથ યોગનાથઃ પાયાદ્ગુણેશઃ કપિલઃ કર્મબન્ધાત્ ॥ ૧૬॥

સનત્કુમારોઽવતુ કામદેવાદ્ધયગ્રીવો માં પથિ દેવહેલનાત્ ।
દેવર્ષિવર્યઃ પુરુષાર્ચનાન્તરાત્કૂર્મો હરિર્માં નિરયાદશેષાત્ ॥ ૧૭॥

ધન્વન્તરિર્ભગવાન્પાત્વપથ્યાદ્દ્વન્દ્વાદ્ભયાદૃષભો નિર્જિતાત્મા ।
યજ્ઞશ્ચ લોકાદવતાજ્જનાન્તાદ્બલો ગણાત્ક્રોધવશાદહીન્દ્રઃ ॥ ૧૮॥

દ્વૈપાયનો ભગવાનપ્રબોધાદ્બુદ્ધસ્તુ પાષણ્ડગણાત્પ્રમાદાત્ ।
કાલ્કિઃ કલેઃ કાલમલાત્પ્રપાતુ ધર્માવનાયોરુકૃતાવતારઃ ॥ ૧૯॥

માં કેશવો ગદયા પ્રાતરવ્યાદ્ગોવિન્દ આસઙ્ગવ આત્તવેણુઃ ।
નારાયણઃ પ્રાહ્ણ ઉદાત્તશક્તિર્મધ્યન્દિને વિષ્ણુરરીન્દ્રપાણિઃ ॥ ૨૦॥

દેવોઽપરાહ્ણે મધુહોગ્રધન્વા સાયન્ત્રિધામાઽવતુ માધવો મામ્ ।
દોષે હૃષીકેશ ઉતાર્ધરાત્રે નિશીથ એકોઽવતુ પદ્મનાભઃ ॥ ૨૧॥

શ્રીવત્સધામાઽપરરાત્ર ઈશઃ પ્રત્યૂષ ઈશોઽસિધરો જનાર્દનઃ ।
દામોદરોઽવ્યાદનુસન્ધ્યં પ્રભાતે વિશ્વેશ્વરો ભગવાન્કાલમૂર્તિઃ ॥ ૨૨॥

ચક્રં યુગાન્તાનલતિગ્મનેમિ ભ્રમત્સમન્તાદ્ભગવત્પ્રયુક્તમ્ ।

દન્દગ્ધિ દન્દગ્ધ્યરિસૈન્યમાશુ કક્ષં યથા વાતસખો હુતાશઃ ॥ ૨૩॥

ગદેऽશનિસ્પર્શનવિસ્ફુલિઙ્ગે નિષ્પિણ્ઢિ નિષ્પિણ્ઢ્યજિતપ્રિયાસિ ।
કૂષ્માણ્ડવૈનાયકયક્ષરક્ષોભૂતગ્રહાંશ્ચૂર્ણય ચૂર્ણયારીન્ ॥ ૨૪॥

ત્વં યાતુધાનપ્રમથપ્રેતમાતૃપિશાચવિપ્રગ્રહઘોરદૃષ્ટીન્ ।
નરેન્દ્ર વિદ્રાવય કૃષ્ણપૂરિતો ભીમસ્વનોऽરેર્હૃદયાનિ કમ્પયન્ ॥ ૨૫॥

ત્વં તિગ્મધારાસિવરારિસૈન્યમીશપ્રયુક્તો મમ છિન્ધિ છિન્ધિ ।
ચક્ષૂંષિ ચર્મન્ શતચન્દ્ર છાદય દ્વિષામઘાનાં હર પાપચક્ષુષામ્ ॥ ૨૬॥

યન્નો ભયં ગ્રહેભ્યોऽભૂત્કેતુભ્યો નૃભ્ય એવ ચ ।
સરીસૃપેભ્યો દંષ્ટ્રિભ્ય ભૂતેભ્યોऽઘેભ્ય એવ ચ ॥ ૨૭॥

સર્વાણ્યેતાનિ ભગવન્નામરૂપાસ્રકીર્તનાત્ ।
પ્રયાંતુ સંક્ષયં સદ્યો યેऽન્યે શ્રેયઃપ્રતીપકાઃ ॥ ૨૮॥

ગરુડો ભગવાંસ્તોત્રસ્તોમશ્છન્દોમયઃ પ્રભુઃ ।
રક્ષત્વશેષકૃચ્છ્રેભ્યો વિષ્વક્સેનઃ સ્વનામભિઃ ॥ ૨૯॥

સર્વાપદ્ભ્યો હરેર્નામરૂપયાનાયુધાનિ નઃ ।
બુદ્ધીન્દ્રિયમનઃપ્રાણાન્ પાન્તુ પાર્ષદભૂષણાઃ ॥ ૩૦॥

યથા હિ ભગવાનેવ વસ્તુતઃ સદસચ્ચ યત્ ।
સત્યેનાનેન નઃ સર્વે યાન્તુ નાશમુપદ્રવાઃ ॥ ૩૧॥

યથૈકાત્મ્યાનુભાવાનાં વિકલ્પરહિતઃ સ્વયમ્ ।
ભૂષણાયુધલિઙ્ગાખ્યા ધત્તે શક્તીઃ સ્વમાયયા ॥ ૩૨॥

તેનૈવ સત્યમાનેન સર્વજ્ઞો ભગવાન્ હરિઃ ।
પાતુ સર્વૈઃ સ્વરૂપૈર્નઃ સદા સર્વત્ર સર્વગઃ ॥ ૩૩॥

વિદિક્ષુ દિક્ષૂર્ધ્વમધઃ સમન્તાદન્તર્બહિર્ભગવાન્નારસિંહઃ ।
પ્રહાપયઁલ્લોકભયં સ્વનેન સ્વતેજસા ગ્રસ્તસમસ્તતેજાઃ ॥ ૩૪॥

મઘવન્નિદમાખ્યાતં વર્મ નારાયણાત્મકમ્ ।
વિજેષ્યસ્યઞ્જસા યેન દંશિતોऽસુરયૂથપાન્ ॥ ૩૫॥

એતદ્ધારયમાણસ્તુ યં યં પશ્યતિ ચક્ષુષા ।
પદા વા સંસ્પૃશેત્સદ્યઃ સાધ્વસાત્સ વિમુચ્યતે ॥ ૩૬॥

ન કુતશ્ચિદ્ભયં તસ્ય વિદ્યાં ધારયતો ભવેત્ ।
રાજદસ્યુગ્રહાદિભ્યો વ્યાધ્યાદિભ્યશ્ચ કર્હિચિત્ ॥ ૩૭॥

ઇમાં વિદ્યાં પુરા કશ્ચિત્કૌશિકો ધારયન્ દ્વિજઃ ।
યોગધારણયા સ્વાઙ્ગં જહૌ સ મરુધન્વનિ ॥ ૩૮॥

તસ્યોપરિ વિમાનેન ગન્ધર્વપતિરેકદા ।
યયૌ ચિત્રરથઃ સ્ત્રીભિર્વૃતો યત્ર દ્વિજક્ષયઃ ॥ ૩૯॥

ગગનાન્ન્યપતત્સદ્યઃ સવિમાનો હ્યવાક્શિરાઃ ।
સ વાલખિલ્યવચનાદસ્થીન્યાદાય વિસ્મિતઃ ॥ ૪૦॥

પ્રાસ્ય પ્રાચીસરસ્વત્યાં સ્નાત્વા ધામ સ્વમન્વગાત્ ।
ય ઇદં શ‍ૃણુયાત્કાલે યો ધારયતિ ચાદૃતઃ ॥

તં નમસ્યન્તિ ભૂતાનિ મુચ્યતે સર્વતોભયાત્ ॥ ૪૧॥

શ્રીશુક ઉવાચ ।
એતાં વિદ્યામધિગતો વિશ્વરૂપાચ્છક્રતુઃ ।
ત્રૈલોક્યલક્ષ્મીં બુભુજે વિનિર્જિત્ય મૃધેઽસુરાન્ ॥ ૪૨॥

। ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે ષષ્ઠસ્કન્ધેઽષ્ટમેઽધ્યાયે
નારાયણવર્મસ્તોત્રં સમ્પૂર્ણમ્ ।
નારયણકવચમ્

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*nArAyaNavarma*

pdf was typeset on December 4, 2021

Please send corrections to *sanskrit@cheerful.com*